॥ वाल्मीकि रामायण॥

३ अरण्यकाण्ड

अध्याय २३

आश्रमं प्रति याते तु खरे खरपराक्रमे ।
तानेवौत्पातिकान्रामः सह भ्रात्रा ददर्श ह ॥ १॥

तानुत्पातान्महाघोरानुत्थितान्रोमहर्षणान् ।
प्रजानामहितान्दृष्ट्वा वाक्यं लक्ष्मणमब्रवीत् ॥ २॥

इमान्पश्य महाबाहो सर्वभूतापहारिणः ।
समुत्थितान्महोत्पातान्संहर्तुं सर्वराक्षसान् ॥ ३॥

अमी रुधिरधारास्तु विसृजन्तः खरस्वनान् ।
व्योम्नि मेघा विवर्तन्ते परुषा गर्दभारुणाः ॥ ४॥

सधूमाश्च शराः सर्वे मम युद्धाभिनन्दिनः ।
रुक्मपृष्ठानि चापानि विवेष्टन्ते च लक्ष्मण ॥ ५॥

यादृशा इह कूजन्ति पक्षिणो वनचारिणः ।
अग्रतो नो भयं प्राप्तं संशयो जीवितस्य च ॥ ६॥

सम्प्रहारस्तु सुमहान्भविष्यति न संशयः ।
अयमाख्याति मे बाहुः स्फुरमाणो मुहुर्मुहुः ॥ ७॥

संनिकर्षे तु नः शूर जयं शत्रोः पराजयम् ।
सुप्रभं च प्रसन्नं च तव वक्त्रं हि लक्ष्यते ॥ ८॥

उद्यतानां हि युद्धार्थं येषां भवति लक्ष्मणः ।
निष्प्रभं वदनं तेषां भवत्यायुः परिक्षयः ॥ ९॥

अनागतविधानं तु कर्तव्यं शुभमिच्छता ।
आपदं शङ्कमानेन पुरुषेण विपश्चिता ॥ १०॥

तस्माद्गृहीत्वा वैदेहीं शरपाणिर्धनुर्धरः ।
गुहामाश्रयशैलस्य दुर्गां पादपसङ्कुलाम् ॥ ११॥

प्रतिकूलितुमिच्छामि न हि वाक्यमिदं त्वया ।
शापितो मम पादाभ्यां गम्यतां वत्स माचिरम् ॥ १२॥

एवमुक्तस्तु रामेण लक्ष्मणः सह सीतया ।
शरानादाय चापं च गुहां दुर्गां समाश्रयत् ॥ १३॥

तस्मिन्प्रविष्टे तु गुहां लक्ष्मणे सह सीतया ।
हन्त निर्युक्तमित्युक्त्वा रामः कवचमाविशत् ॥ १४॥

सा तेनाग्निनिकाशेन कवचेन विभूषितः ।
बभूव रामस्तिमिरे विधूमोऽग्निरिवोत्थितः ॥ १५॥

स चापमुद्यम्य महच्छरानादाय वीर्यवान् ।
बभूवावस्थितस्तत्र ज्यास्वनैः पूरयन्दिशः ॥ १६॥

ततो देवाः सगन्धर्वाः सिद्धाश्च सह चारणैः ।
ऊचुः परमसन्त्रस्ता गुह्यकाश् च परस्परम् ॥ १७॥

चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ।
एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति ॥ १८॥

ततो गम्भीरनिर्ह्रादं घोरवर्मायुधध्वजम् ।
अनीकं यातुधानानां समन्तात्प्रत्यदृश्यत ॥ १९॥

सिंहनादं विसृजतामन्योन्यमभिगर्जताम् ।
चापानि विस्फरयतां जृम्भतां चाप्यभीक्ष्णशः ॥ २०॥

विप्रघुष्टस्वनानां च दुन्दुभींश्चापि निघ्नताम् ।
तेषां सुतुमुलः शब्दः पूरयामास तद्वनम् ॥ २१॥

तेन शब्देन वित्रस्ताः श्वापदा वनचारिणः ।
दुद्रुवुर्यत्र निःशब्दं पृष्ठतो नावलोकयन् ॥ २२॥

तत्त्वनीकं महावेगं रामं समुपसर्पत ।
घृतनानाप्रहरणं गम्भीरं सागरोपमम् ॥ २३॥

रामोऽपि चारयंश्चक्षुः सर्वतो रणपण्डितः ।
ददर्श खरसैन्यं तद्युद्धाभिमुखमुद्यतम् ॥ २४॥

वितत्य च धनुर्भीमं तूण्याश्चोद्धृत्य सायकान् ।
क्रोधमाहारयत्तीव्रं वधार्थं सर्वरक्षसाम् ॥ २५॥

दुष्प्रेक्ष्यः सोऽभवत्क्रुद्धो युगान्ताग्निरिव ज्वलन् ।

तं दृष्ट्वा तेजसाविष्टं प्राव्यथन्वनदेवताः ॥ २६ ॥

तस्य क्रुद्धस्य रूपं तु रामस्य ददृशे तदा ।
दक्षस्येव क्रतुं हन्तुमुद्यतस्य पिनाकिनः ॥ २७ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com